श्रीजयदेवकविविरचितम्।

श्रीगीतगोविन्दम्

प्रथमः सर्गः।

।सामोददामोदरः।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती।
श्रीवासुदेवरतिकेलिकथासमेतम्
एतं करोति जयदेवकविः प्रबन्धम्॥

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम्।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम्॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः॥

॥ गीतम् १ ॥

मालवगौडरागेण रूपकतालेन च गीयते।

प्रलयपयोधिजले धृतवानसि वेदम्।
विहितवहित्रचरित्रमखेदम्॥
केशव धृतमीनशरीर जय जगदीश हरे॥१॥

क्षितिरतिविपुलतरे तिष्ठति तव पृष्ठे।
धरणिधरणकिणचक्रगरिष्ठे॥
केशव धृतकच्छपरूप जय जगदीश हरे॥२॥

वसति दशनशिखरे धरणी तव लग्ना।
शशिनि कलङ्ककलेव निमग्ना॥
केशव धृतशूकररूप जय जगदीश हरे॥३॥

तव करकमलवरे नखमद्भुतशृङ्गम्।
दलितहिरण्यकशिपुतनुभृङ्गम्॥
केशव धृतनरहरिरूप जय जगदीश हरे॥४॥

छलयसि विक्रमणे बलिमद्भुतवामन।
पदनखनीरजनितजनपावन॥
केशव धृतवामनरूप जय जगदीश हरे॥५॥

क्षत्रियरुधिरमये जगदपगतपापम्।
स्नपयसि पयसि शमितभवतापम्॥
केशव धृतभृगुपतिरूप जय जगदीश हरे॥६॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम्।
दशमुखमौलिबलिं रमणीयम्॥
केशव धृतरघुपतिरूप जय जगदीश हरे॥७॥

वहसि वपुषि विशदे वसनं जलदाभम्।
हलहतिभीतिमिलितयमुनाभम्॥
केशव धृतहलधररूप जय जगदीश हरे॥८॥

निन्दसि यज्ञविधेरहह श्रुतिजातम्।
सदयहृदय दर्शितपशुघातम्॥
केशव धृतबुद्धशरीर जय जगदीश हरे॥९॥

म्लेच्छनिवहनिधने कलयसि करवालम्।
धूमकेतुमिव किमपि करालम्॥
केशव धृतकल्किशरीर जय जगदीश हरे॥१०॥

श्रीजयदेवकवेरिदमुदितमुदारम्।
शृणु सुखदं शुभदं भवसारम्॥
केशव धृतदशविधरूप जय जगदीश हरे॥११॥

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥१२॥

॥गीतम् २॥

गुर्जरीरागनिःसारतालाभ्यां गीयते।

श्रितकमलाकुचमण्डल धृतकुण्डल ए।
कलितललितवनमाल जय जय देव हरे॥१॥

दिनमणिमण्डलमण्डन भवखण्डन ए।
मुनिजनमानसहंस जय जय देव हरे॥२॥

कालियविषधरगञ्जन जनरञ्जन ए।
यदुकुलनलिनदिनेश जय जय देव हरे॥ ३॥

मधुमुरनरकविनाशन गरुडासन ए।
सुरकुलकेलिनिदान जय जय देव हरे॥ ४॥

अमलकमलदललोचन भवमोचन ए।
त्रिभुवनभवननिधान जय जय देव हरे॥ ५॥

जनकसुताकृतभूषण जितदूषण ए।
समरशमितदशकण्ठ जय जय देव हरे॥ ६॥

अभिनवजलधरसुन्दर धृतमन्दर ए।
श्रीमुखचन्द्रचकोर जय जय देव हरे॥ ७॥

तव चरणे प्रणता वयमिति भावय ए।
कुरु कुशलं प्रणतेषु जय जय देव हरे॥ ८॥

श्रीजयदेवकवेरिदं कुरुते मुदम् ए।
मङ्गलमुज्ज्वलगीतं जय जय देव हरे॥ ९॥

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य।
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी॥

॥ गीतम् ३ ॥

वसन्तरागयतितालाभ्यां गीयते।

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे॥
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥ध्रुवम् ॥१॥

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।
अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलापे॥विहरति० ॥२॥

मृगमदसौरभरभसवशंवदनवदलमालतमाले।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले॥विहरति० ॥३॥

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे।
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे॥विहरति० ॥४॥

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे॥विहरति० ॥५॥

माधविकापरिमलललिते नवमालिकयातिसुगन्धौ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ॥विहरति० ॥६॥

स्फुरदतिमुक्तालतापरिरम्भणपुलकितमुकुलितचूते।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते॥विहरति० ॥७॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्॥विहरति० ॥८॥

दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन् काननानि।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः॥

अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः।
किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयाद्
उन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम्।
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम्॥

॥ गीतम् ४ ॥

रामकरीरागेण यतितालेन च गीयते।

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥
हरिरिह मुग्धवधूनिकरे विलासिनी विलसति केलिपरे॥ध्रुवम् ॥१॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम्॥हरिरिह० ॥२॥

कापि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्॥हरिरिह० ॥३॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले॥हरिरिह० ॥४॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले॥हरिरिह० ॥५॥

करतलतालतरलवलयावलिकलितकलस्वनवंशे।
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥हरिरिह० ॥६॥

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम्।
पश्यति सस्मितचारुतरामपरामनुगच्छति वामाम्॥हरिरिह० ॥७॥

श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम्।
वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम्॥हरिरिह० ॥८॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।
स्वछन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः।

द्वितीयः सर्गः।

।अक्लेशकेशवः।

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम्॥

॥गीतम् ५॥

गुर्जरीरागयतितालाभ्यां गीयते।

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्।
वलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्॥
रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम्॥ध्रुवम् ॥१॥

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम्॥रासे० ॥२॥

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम्॥रासे० ॥३॥

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम्।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम्॥रासे० ॥४॥

जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटम्।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकवाटम्॥रासे० ॥५॥

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम्।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्॥रासे० ॥६॥

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम्।
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम्॥रासे० ॥७॥

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम्।
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम्॥रासे० ॥८॥

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम्॥

॥गीतम् ६॥

मालवगौडरागेण एकतालीतालेन च गीयते।

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।
चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम्॥
सखि हे केशिमथनमुदारं
रमय मया सह मदनमनोरथभावितया सविकारम्॥ध्रुवम् ॥१॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम्।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्॥सखि हे० ॥२॥

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम्।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम्॥सखि हे० ॥३॥

अलसनिमीलितलोचनया पुलकावलिललितकपोलम्।
श्रमजलसकलकलेवरया वरमदनमदादतिलोलम्॥सखि हे० ॥४॥

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम्।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम्॥सखि हे० ॥५॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम्।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम्॥सखि हे० ॥६॥

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम्।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम्॥सखि हे० ॥७॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम्।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम्॥सखि हे० ॥८॥

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्वल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम्।
मामुद्वीक्ष्य विलज्जितस्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च॥

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासः कासारोपवनपवनोऽपि व्यथयति।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति॥

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धदृष्टस्तनम्।
गोपीनां निभृतं निरीक्ष्य गमिताकाङ्क्षश्चिरं चिन्तय-
नन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः॥

तृतीयः सर्गः।

।मुग्धमधुसूदनः।

कंसारिरपि संसार-
वासनाबन्धशृङ्खलाम्।
राधामाधाय हृदये
तत्याज व्रजसुन्दरीः॥

इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः।
कृतानुतापः स कलिन्दनन्दिनी-
तटान्तकुञ्जे विषसाद माधवः॥

॥गीतम् ७॥

गुर्जरीरागेण यतितालेन च गीयते।

मामियं चलिता विलोक्य वृतं वधूनिचयेन।
सापराधतया मयापि न वारितातिभयेन॥
हरिहरि हतादरतया गता सा कुपितेव॥ध्रुवम् ॥१॥

किं करिष्यति किं वदिष्यति सा चिरं विरहेण।
किं धनेन जनेन किं मम जीवितेन गृहेण॥हरिहरि० ॥२॥

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥हरिहरि० ॥३॥

तामहं हृदि सङ्गतामनिशं भृशं रमयामि।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि॥हरिहरि० ॥४॥

तन्वि खिन्नमसूयया हृदयं तवाकलयामि।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि॥हरिहरि० ॥५॥

दृश्यसे पुरतो गतागतमेव मे विदधासि।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि॥हरिहरि० ॥६॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि॥हरिहरि० ॥७॥

वर्णितं जयदेवकेन हरेरिदं प्रवणेन।
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन॥हरिहरि० ॥८॥

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि॥

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम्।
तस्या एव मृगीदृशो मनसिज प्रेङ्खत्कटाक्षाशुग-
श्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते॥

भ्रूपल्लवो धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण।
तस्यामनङ्गजयजङ्गमदेवतायाम्
अस्त्राणि निर्जितजगन्ति किमर्पितानि॥

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम्।

मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तं स्तनमण्डलं तव कथं प्राणैर्मम क्रीडति॥

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमास्
तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते॥

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः।
संमुग्धे मधुसूदनस्य मधुरे राधामुखेन्दौ सुधा-
सारे कन्दलिताश्चिरं दधतु वः क्षेमं कटाक्षोर्मयः॥

चतुर्थः सर्गः।

।स्निग्धमधुसूदनः।

यमुनातीरवानीर-
निकुञ्जे मन्दमास्थितम्।
प्राह प्रेमभरोद्भ्रान्तं
माधवं राधिकासखी॥

॥गीतम् ८॥

कर्णाटरागैकतालीतालाभ्यां गीयते।

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम्।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्॥
सा विरहे तव दीना
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना॥ध्रुवम् ॥१॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालम्।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम्॥सा विरहे० ॥२॥

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम्॥सा विरहे० ॥३॥

वहति च वलितविलोचनजलधरमाननकमलमुदारम्।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम्॥सा विरहे० ॥४॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम्॥सा विरहे० ॥५॥

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम्।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्॥सा विरहे० ॥६॥

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम्।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम्॥सा विरहे० ॥७॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।
हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयम्॥सा विरहे० ॥८॥

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम्॥

॥ गीतम् ९ ॥

देशाख्यरागैकतालीतालाभ्यां गीयते।

स्तनविनिहितमपि हारमुदारम्।
सा मनुते कृशतनुरिव भारम्॥
राधिका विरहे तव केशव॥ध्रुवम् ॥१॥

सरसमसृणमपि मलयजपङ्कम्।
पश्यति विषमिव वपुषि सशङ्कम्॥राधिका० ॥२॥

श्वसितपवनमनुपमपरिणाहम्।
मदनदहनमिव वहति सदाहम्॥राधिका० ॥३॥

दिशि दिशि किरति सजलकणजालम्।
नयननलिनमिव विगलितनालम्॥राधिका० ॥४॥

त्यजति न पाणितलेन कपोलम्।
बालशशिनमिव सायमलोलम्॥राधिका० ॥५॥

नयनविषयमपि किसलयतल्पम्।
गणयति विहितहुताशविकल्पम्॥राधिका० ॥६॥

हरिरिति हरिरिति जपति सकामम्।
विरहविहितमरणेव निकामम्॥राधिका० ॥७॥

श्रीजयदेवभणितमिति गीतम्।
सुखयतु केशवपदमुपनीतम्॥राधिका० ॥८॥

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्ववैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः॥

स्मरातुरां दैवतवैद्यहृद्य त्वदङ्गसङ्गामृतमात्रसाध्याम्।
विमुक्तबाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि॥

कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमः कमलिनीचिन्तासु सन्ताम्यति।
किन्तु क्लान्तिवशेन शीतलतरं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति॥

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम्॥

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः।
दर्पेणेव तदर्पिताधरतटी सिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः॥

पञ्चम सर्गः।

।आकाङ्क्षपुण्डरीकाक्षः।

अहमिह निवसामि याहि राधाम्
अनुनय मद्वचनेन चानयेथाः।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम्॥

॥ गीतम् १० ॥

देशीवराडीरागेण रूपकतालेन गीयते।

वहति मलयसमीरे मदनमुपनिधाय।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय॥
सखि सीदति तव विरहे वनमाली॥ध्रुवम् ॥१॥

दहति शिशिरमयूखे मरणमनुकरोति।
पतति मदनविशिखे विलपति विकलतरोऽति॥सखि० ॥२॥

ध्वनति मधुपसमूहे श्रवणमपिदधाति।
मनसि वलितविरहे निशि निशि रुजमुपयाति॥सखि० ॥३॥

वसति विपिनविताने त्यजति ललितधाम।
लुठति धरणिशयने बहु विलपति तव नाम॥सखि० ॥४॥

भणति कविजयदेवे विरहविलसितेन।
मनसि रभसविभवे हरिरुदयतु सुकृतेन॥सखि० ॥५॥

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्
तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥

॥ गीतम् ११ ॥

गुर्जरीरागैकतालीतालेन गीयते।

रतिसुखसारे गतमभिसारे मदनमनोहरवेषम्।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम्॥
धीरसमीरे यमुनातीरे वसति वने वनमाली
पीनपयोधरपरिसरमर्दनचञ्चलकरयुगशाली॥ध्रुवम् ॥१॥

नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम्।
बहु मनुते ननु ते तनुसङ्गतपवनचलितमपि रेणुम्॥धीरसमीरे० ॥२॥

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम्।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम्॥धीरसमीरे० ॥३॥

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम्।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम्॥धीरसमीरे० ॥४॥

उरसि मुरारेरुपहितहारे घन इव तरलबलाके।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥धीरसमीरे० ॥५॥

विगलितवसनं परिहृतरसनं घटय जघनमपिधानम्।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिधानम्॥धीरसमीरे० ॥६॥

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम्॥धीरसमीरे० ॥७॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम्।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम्॥धीरसमीरे० ॥८॥

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते॥

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः॥

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो-
र्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः॥

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम्॥

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषोदयः
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः॥

षष्ठः सर्गः।

।धृष्टवैकुण्ठः।

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह॥

॥गीतम् १२॥

गुणकरीरागेण रूपकतालेन गीयते।

पश्यति दिशि दिशि रहसि भवन्तम्।
तदधरमधुरमधूनि पिबन्तम्॥
नाथ हरे सीदति राधा वासगृहे॥ध्रुवम् ॥१॥

त्वदभिसरणरभसेन वलन्ती।
पतति पदानि कियन्ति चलन्ती॥नाथ हरे० ॥२॥

विहितविशदबिसकिसलयवलया।
जीवति परमिह तव रतिकलया॥नाथ हरे० ॥३॥

मुहुरवलोकितमण्डनलीला।
मधुरिपुरहमिति भावनशीला॥नाथ हरे० ॥४॥

त्वरितमुपैति न कथमभिसारम्।
हरिरिति वदति सखीमनुवारम्॥नाथ हरे० ॥५॥

श्लिष्यति चुम्बति जलधरकल्पम्।
हरिरुपगत इति तिमिरमनल्पम्॥नाथ हरे० ॥६॥

भवति विलम्बिनि विगलितलज्जा।
विलपति रोदिति वासकसज्जा॥नाथ हरे० ॥७॥

श्रीजयदेवकवेरिदमुदितम्।
रसिकजनं तनुतामतिमुदितम्॥नाथ हरे० ॥८॥

विपुलपुलकपालिः स्स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती।
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी॥

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति॥

किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहे
भ्रातर्यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम्।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः॥

सप्तमः सर्गः।

।नागरनारायणः।

अत्रान्तरे च कुलटाकुलवर्त्मपात-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः॥

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा।
विरचितविविधविलापं सा परितापं चकारोच्चैः॥

॥ गीतम् १३ ॥

मालवरागयतितालाभ्यां गियते।

कथितसमयेऽपि हरिरहह न ययौ वनम्।
मम विफलमिदममलमपि रूपयौवनम्॥
यामि हे कमिह शरणं सखीजनवचनवञ्चिता॥ध्रुवम् ॥१॥

यदनुगमनाय निशि गहनमपि शीलितम्।
तेन मम हृदयमिदमसमशरकीलितम्॥यामि हे० ॥२॥

मम मरणमेव वरमतिवितथकेतना।
किमिह विषहामि विरहानलमचेतना॥यामि हे० ॥३॥

मामहह विधुरयति मधुरमधुयामिनी।
कापि हरिमनुभवति कृतसुकृतकामिनी॥यामि हे० ॥४॥

अहह कलयामि वलयादिमणिभूषणम्।
हरिविरहदहनवहनेन बहुदूषणम्॥यामि हे० ॥५॥

कुसुमसुकुमारतनुमतनुशरलीलया।
स्त्रगपि हृदि हन्ति मामतिविषमशीलया॥यामि हे० ॥६॥

अहमिह निवसामि न गणितवनवेतसा।
स्मरति मधुसूदनो मामपि न चेतसा॥यामि हे० ॥७॥

हरिचरणशरणजयदेवकविभारती।
वसतु हृदि युवतिरिव कोमलकलावती॥यामि हे० ॥८॥

तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभि-
बर्द्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति।
कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः
सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः॥

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम्।
विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह॥

॥ गीतम् १४ ॥

वसन्तरागयतितालाभ्यां गियते।

स्मरसमरोचितविरचितवेशा।
दलितकुसुमदरविलुलितकेशा॥
कापि मधुरिपुणा विलसति युवतिरधिकगुणा॥ध्रुवम् ॥१॥

हरिपरिरम्भणवलितविकारा।
कुचकलशोपरि तरलितहारा॥कापि० ॥२॥

विचलदलकललितानन्चन्द्रा।
तदधरपानरभसकृततन्द्रा॥कापि० ॥३॥

चञ्चलकुण्डलललितकपोला।
मुखरितरसनजघनगतिलोला॥कापि० ॥४॥

दयितविलोकितलज्जितहसिता।
बहुविधकूजितरतिरसरसिता॥कापि० ॥५॥

विपुलपुलकपृथुवेपथुभङ्गा।
श्वसितनिमीलितविकसदनङ्गा॥कापि० ॥६॥

श्रमजलकणभरसुभगशरीरा।
परिपतितोरसि रतिरणधीरा॥कापि० ॥७॥

श्रीजयदेवभणितहरिरमितम्।
कलिकलुषं जनयतु परिशमितम्॥कापि० ॥८॥

विरहपाण्डुमुरारिमुखाम्बुज-
द्युतिरयं तिरयन्नपि वेदनाम्।
विधुरतीव तनोति मनोभुवः
सुहृदये हृदये मदनव्यथाम्॥

॥गीतम् १५॥

गुर्जरीरागैकतालीतालेन गीयते।

समुदितमदने रमणीवदने चुम्बनवलिताधरे।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना॥ध्रुवम् ॥१॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने।
कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने॥रमते० ॥२॥

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते।
मणिसरममलं तारकपटलं नखपदशशिभूषिते॥रमते० ॥३॥

जितबिसशकले मृदुभुजयुगले करतलनलिनीदले।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले॥रमते० ॥४॥

रतिगृहजघने विपुलापघने मनसिजकनकासने।
मणिमयरसनं तोरणहसनं विकिरति कृतवासने॥रमते० ॥५॥

चरणकिसलये कमलानिलये नखमणिगणपूजिते।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते॥रमते० ॥६॥

रमयति सुभृशं कामपि सुदृशं खलहलधरसोदरे।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे॥रमते० ॥७॥

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके॥रमते० ॥८॥

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति॥

॥गीतम् १६॥

देशवराडीरागेण रूपकतालेन गीयते।

अनिलतरलकुवलयनयनेन।
तपति न सा किसलयशयनेन॥
सखि या रमिता वनमालिना॥ध्रुवम् ॥१॥

विकसितसरसिजललितमुखेन।
स्फुटति न सा मनसिजविशिखेन॥सखि० ॥२॥

अमृतमधुरमृदुतरवचनेन।
ज्वलति न सा मलयजपवनेन॥सखि० ॥३॥

स्थलजलरुहरुचिकरचरणेन।
लुठति न सा हिमकरकिरणेन॥सखि० ॥४॥

सजलजलदसमुदयरुचिरेण।
दहति न सा हृदि विरहदवेन॥सखि० ॥५॥

कनकनिकषरुचिशुचिवसनेन।
श्वसिति न सा परिजनहसनेन॥सखि० ॥६॥

सकलभुवनजनवरतरुणेन।
वहति न सा रुजमतिकरुणेन॥सखि० ॥७॥

श्रीजयदेवभणितवचनेन।
प्रविशतु हरिरपि हृदयमनेन॥सखि० ॥८॥

मनोभवानन्दन चन्दनानिल
प्रसीद रे दक्षिण मुञ्च वामताम्।
क्षणं जगत्प्राण विधाय माधवं
पुरो मम प्राणहरो भविष्यसि॥

रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः॥

बाधां विधेहि मलयानिल पञ्चबाण
प्राणान्गृहाण न गृहं पुनराश्रयिष्ये।
किं ते कृतान्तभगिनि क्षमया तरङ्गै-
रङ्गानि सिञ्च मम शाम्यतु देहदाहः॥

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।

व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने
स्वादुस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः॥

अष्टमः सर्गः।

।विलक्ष्यलक्ष्मीपतिः।

अथ कथमपि यामिनीं विनीय
स्मरशरजर्जरितापि सा प्रभाते।
अनुनयवचनं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम्॥

॥गीतम् १७॥

भैरवीरागयतितालाभ्यां गीयते।

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम्॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादं
तामनुसर सरसीरुहलोचन या तव हरति विषादम्॥ध्रुवम् ॥१॥

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम्॥हरिहरि० ॥२॥

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम्।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम्॥हरिहरि० ॥३॥

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम्।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम्॥हरिहरि० ॥४॥

दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम्॥हरिहरि० ॥५॥

बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम्।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम्॥हरिहरि० ॥६॥

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम्।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम्॥हरिहरि० ॥७॥

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम्।
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम्॥हरिहरि० ॥८॥

तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुणद्योतिहृदयम्।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति॥

अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसन-
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम्।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहयतु वः श्रेयांसि वंशीरवः॥

नवमः सर्गः।

।मुग्धमुकुन्दः।

तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नाम्।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः सखी॥

॥गीतम् १८॥

गुर्जरीरागयतितालाभ्यां गियते।

हरिरभिसरति वहति मधुपवने।
किमपरमधिकसुखं सखि भवने॥
माधवे मा कुरु मानिनि मानमये॥ध्रुवम् ॥१॥

तालफलादपि गुरुमतिसरसम्।
किं विफलीकुरुषे कुचकलशम्॥माधवे० ॥२॥

कति न कथितमिदमनुपदमचिरम्।
मा परिहर हरिमतिशयरुचिरम्॥माधवे० ॥३॥

किमिति विषीदसि रोदिषि विकला।
विहसति युवतिसभा तव सकला॥माधवे० ॥४॥

सजलनलिनीदलशीलितशयने।
हरिमवलोकय सफलय नयने॥माधवे० ॥५॥

जनयसि मनसि किमिति गुरुखेदम्।
शृणु मम वचनमनीहितभेदम्॥माधवे० ॥६॥

हरिरुपयातु वदतु बहुमधुरम्।
किमिति करोषि हृदयमतिविधुरम्॥माधवे० ॥७॥

श्रीजयदेवभणितमतिललितम्।
सुखयतु रसिकजनं हरिचरितम्॥माधवे० ॥८॥

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये।
तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः॥

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दिन्दिरम्।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे॥

दशमः सर्गः।

।चतुरचतुर्भुजः।

अत्रान्तरे मसृणरोषवशामसीम-
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य।
सव्रीडमीक्षितसखीवदनां प्रदोषे
सानन्दगद्गदपदं हरिरित्युवाच॥

॥गीतम् १९॥

देशवराडीरागाष्टतालीतालाभ्यां गीयते।

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरम्।
स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयतु लोचनचकोरम्॥
प्रिये चारुशीले मुञ्च मयि मानमनिदानं
सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम्॥ध्रुवम् ॥१॥

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनयनशरघातम्।
घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम्॥प्रिये० ॥२॥

त्वमसि मम भूषणं त्वमसि मम जीवनं त्वमसि मम भवजलधिरत्नम्।
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम्॥प्रिये० ॥३॥

नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपम्।
कुसुमशरबाणभावेन यदि रञ्जयसि कृष्णमिदमेतदनुरूपम्॥प्रिये० ॥४॥

स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी रञ्जयतु तव हृदयदेशम्।
रसतु रशनापि तव घनजघनमण्डले घोषयतु मन्मथनिदेशम्॥प्रिये० ॥५॥

स्थलकमलगञ्जनं मम हृदयरञ्जनं जनितरतिरङ्गपरभागम्।
भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागम्॥प्रिये० ॥६॥

स्मरगरलखण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारम्।
ज्वलति मयि दारुणो मदनकदनारुणो हरतु तदुपाहितविकारम्॥प्रिये० ॥७॥

इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातम्।
जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातम्॥प्रिये० ॥८॥

परिहर कृतातङ्के शङ्कां त्वया सततं घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
प्रणयिनि परीरम्भारम्भे विधेहि विधेयताम्॥

मुग्धे विधेहि मयि निर्दयदन्तदंश-
दोर्वल्लिबन्धनिविडस्तनपीडनानि।
चण्डि त्वमेव मुदमञ्च न पञ्चबाण-
चाण्डालकाण्डदलनादसवः प्रयान्तु॥

शशिमुखि तव भाति भङ्गुरभ्रू-
र्युवजनमोहकरालकालसर्पी।
तदुदितभयभञ्जनाय यूनां
त्वदधरसीधुसुधैव सिद्धमन्त्रः॥

व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थितः॥

बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
र्गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचने लोचनम्।
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः॥

दृशौ तव मदालसे वदनमिन्दुसन्दीपनं
गतिर्जनमनोरमा विजितरम्भमूरुद्वयम्।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवतं वहसि तन्वि पृथ्वीगता॥

स प्रीतिं तनुतां हरिः कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत् कुम्भेन सम्भेदवान्।
यत्र स्विद्यति मीलति क्षणमपि क्षिप्ते द्विपे तत्क्षणात्
कंसस्यालमभूत्जितं जितमिति व्यामोहकोलाहलः॥

एकादशः सर्गः।

।सानन्ददामोदरः।

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम्।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद॥

॥गीतम् २०॥

वसन्तरागयतितालाभ्यां गीयते।

विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम्।
सम्प्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्॥
मुग्धे मधुमथनमनुगतमनुसर राधिके॥ध्रुवम् ॥१॥

घनजघनस्तनभारभरे दरमन्थरचरणविहारम्।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालनिकारम्॥मुग्धे० ॥२॥

शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम्।
कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावम्॥मुग्धे० ॥३॥

अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम्।
प्रेरणमिव करभोरु करोति गतिं प्रति मुञ्च विलम्बम्॥मुग्धे० ॥४॥

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम्।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम्॥मुग्धे० ॥५॥

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसङ्गम्।
चण्डि रणितरसनारवडिण्डिममभिसर सरसमलङ्गम्॥मुग्धे० ॥६॥

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलम्।
चल वलयक्वणितैरवबोधय हरिमपि निजगतिशीलम्॥मुग्धे० ॥७॥

श्रीजयदेवभणितमधरीकृतहारमुदासितरामम्।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम्॥मुग्धे० ॥८॥

सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि समागत्येति चिन्ताकुलः।
स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः॥

अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम्।
धूर्तानामभिसारसत्वरहृदां विष्वङ् निकुञ्जे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति॥

काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो रुचिमञ्जरीभिः।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति॥

हारावलीतरलकाञ्चनकाञ्चिदाम-
मञ्जीरकङ्कणमणिद्युतिदीपितस्य।
द्वारे निकुञ्जनिलयस्य हरिं विलोक्य
व्रीडावतीमथ सखीमियमित्युवाच॥

॥ गीतम् २१ ॥

वराडीरागरूपकतालाभ्यां गीयते।

मञ्जुतरकुञ्जतलकेलिसदने।
विलस रतिरभसहसितवदने॥
प्रविश राधे माधवसमीपमिह॥ध्रुवम् ॥१॥

नवभवदशोकदलशयनसारे।
विलस कुचकलशतरलहारे॥प्रविश० ॥२॥

कुसुमचयरचितशुचिवासगेहे।
विलस कुसुमसुकुमारदेहे॥प्रविश० ॥३॥

चलमलयवनपवनसुरभिशीते।
विलस रतिवलितललितगीते॥प्रविश० ॥४॥

विततबहुवल्लिनवपल्लवघने।
विलस चिरमलसपीनजघने॥प्रविश० ॥५॥

मधुमुदितमधुपकुलकलितरावे।
विलस मदनरससरसभावे॥प्रविश० ॥६॥

मधुरतरपिकनिकरनिनदमुखरे।
विलस दशनरुचिरुचिरशिखरे॥प्रविश० ॥७॥

विहितपद्मावतीसुखसमाजे।
कुरु मुरारे मङ्गलशतानि॥
भणति जयदेवकविराजराजे॥प्रविश० ॥८॥

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधासम्बाधबिम्बाधरम्।
अस्याङ्कं तदलङ्कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः॥

सा ससाध्वससानन्दं गोविन्दे लोललोचना।
सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम्॥

॥गीतम् २२॥

वराडीरागयतितालाभ्यां गीयते।

राधावदनविलोकनविकसितविविधविकारविभङ्गम्।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम्॥
हरिमेकरसं चिरमभिलषितविलासं
सा ददर्श गुरुहर्षवशंवदवदनमनङ्गविकासम्॥ध्रुवम् ॥१॥

हारममलतरतारमुरसि दधतं परिलम्ब्य विदूरम्।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम्॥हरि० ॥२॥

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम्।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम्॥हरि० ॥३॥

तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम्।
स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम्॥हरि० ॥४॥

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम्।
स्मितरुचिकुसुमसमुल्लसिताधरपल्लवकृतरतिलोभम्॥हरि० ॥५॥

शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशम्।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम्॥हरि० ॥६॥

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम्।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम्॥हरि० ॥७॥

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम्।
प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारम्॥हरि० ॥८॥

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः।
तदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रकर इव हर्षाश्रुनिकरः॥

भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
स्मितं याते गेहाद्बहिरवहितालीपरिजने।
प्रियास्यं पश्यन्त्याः स्मरशरसमाहूतसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः॥

सानन्दं नन्दसूनुर्दिशतु मितपरं सम्मदं मन्दमन्दं
राधामाधाय बाह्वोर्विवरमनु दृढं पीडयन्प्रीतियोगात्।
तुङ्गौ तस्या उरोजावतनुवरतनोर्निगतौ मा स्म भूतां
पृष्ठं निर्भिद्य तस्माद्बहिरिति वलितग्रीवमालोक्यन्वः॥

जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव।
भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः॥

सौन्दर्यैकनिधेरनङ्गललनालावण्यलीलाजुषो
राधाया हृदि पल्वले मनसिजक्रीडैकरङ्गस्थले।
रम्योरोजसरोजखेलनरसित्वादात्मनः ख्यापयन्
ध्यातुर्मानसराजहंसनिभतां देयान्मुकुन्दो मुदम्॥

द्वादशः सर्गः।

।सुप्रीतपीताम्बरः।

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-
स्मरशरवशाकूतस्स्फीतस्मितस्त्रपिताधराम्।
सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-
प्रसरशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम्॥

॥गीतम् २३॥

विभासरागैकतालीतालाभ्यां गीयते।

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम्।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम्॥
क्षणमधुना नारायणमनुगतमनुसर राधिके॥ध्रुवम् ॥१॥

करकमलेन करोमि चरणमहमागमितासि विदूरम्।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम्॥क्षण० ॥२॥

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम्।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम्॥क्षण० ॥३॥

प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम्।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम्॥क्षण० ॥४॥

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासम्।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम्॥क्षण० ॥५॥

शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम्।
श्रुतिपुटयुगले पिकरुतविकले शमय चिरादवसादम्॥क्षण० ॥६॥

मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम्।
मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदम्॥क्षण० ॥७॥

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम्।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम्॥क्षण० ॥८॥

प्रत्यूहः पुलकाङ्कुरेण निविडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू
दुद्भूतः स तयोर्बभूव सुरतारम्भः प्रियम्भावुकः॥

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।
हस्तेनानमितः कचेऽधरमधुस्यन्देन संमोहितः
कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः॥

माराङ्के रतिकेलिसङ्कुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।
निष्पन्दा जघनस्थली शिथिलता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति॥

तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धौतोऽधरशोणिमा विलुलिताः स्रस्तस्रजो मूर्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितम्॥

व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ
क्लिष्टा दृष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः।
काञ्चीकाञ्चिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति॥

ईषन्मीलितदृष्टि मुग्धविलसत्सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम्।
श्वासोन्नद्धपयोधरोपरिपरिष्वङ्गात्कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तिनिःसहतनोर्धन्यो धयत्याननम्॥

इति मनसा निगदन्तं सुरतान्ते सा नितान्तखिन्नाङ्गी।
राधा जगाद सादरमिदमानन्देन गोविन्दम्॥

॥गीतम् २४॥

रामकरीरागयतितालाभ्यां गीयते।

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे।
मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे॥
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने॥ध्रुवम् ॥१॥

अलिकुलगञ्जनसञ्जनकं रतिनायकसायकमोचने।
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने॥निज० ॥२॥

नयनकुरङ्गतरङ्गविकासनिरासकरे श्रुतिमण्डले।
मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले॥निज० ॥३॥

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम संमुखे।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे॥निज० ॥४॥

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।
विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे॥निज० ॥५॥

मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे॥निज० ॥६॥

सरसघने जघने मम शम्बरदारणवारणकन्दरे।
मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे॥निज० ॥७॥

श्रीजयदेववचसि जयदे हृदयं सदयं कुरु मण्डने।
हरिचरणस्मरणामृतकृतकलिकलुषभवज्वरखण्डने॥निज० ॥८॥

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो-
घटय जघने काञ्चीमञ्च स्त्रजा कबरीभरम्।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरा-
विति निगदितः प्रीतः पीताम्बरोऽपि तथाकरोत्॥

यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम्।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः॥

साध्वी माध्वीक चिन्ता न भवति भवतः शर्करे कर्करासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते।
माकन्द क्रन्द कान्ताधर धरणितलं गच्छ यच्छन्ति याव-
द्भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि॥

इत्थं केलिततीर्विहृत्य यमुनाकूले समं राधया
तद्रोमावलिमौक्तिकावलियुगे वेणीभ्रमं बिभ्रति।
तत्राह्लादिकुचप्रयागफलयोर्लिप्सावतोर्हस्तया-
र्व्यापाराः पुरुषोत्तमस्य ददतु स्स्फीतां मुदा सम्पदम्॥

पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
संक्रान्तप्रतिबिम्बसङ्कलनया बिभ्रद्विभुप्रक्रियाम्।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचरन्नुपचितीभूतो हरिः पातु वः॥

त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
    शङ्के सुन्दरि कालकूटमपिवत्मूढो मृडानीपतिः।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वक्षोऽञ्चलं
    पद्मायाः स्तनकोरकोपरिमिलन्नेत्रो हरिः पातु वः॥

श्रीभोजदेवप्रभवस्य रामादेवीसुत श्रीजयदेवकस्य।
पराशरादिप्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु॥

॥समाप्तोऽयं ग्रन्थः॥